# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–अक्टूबर, २०१९

| | | |
|---|---|---|
| कक्षाः- शास्त्री-२ (SEM-3) | प्रश्नपत्रम् - ५ | गुणाः - ७० |
| विषयः: नव्यन्यायः | (C.C- 2.3.5) | समयः – ८ तः ११ |
| दिनाङ्कः : १४/१०/२०१९ | (ग्रन्थः – पञ्चलक्षणी, प्र.द्वि.तृतीय लक्षणानि) | |

---

### विभागः- १

**प्रश्नः- १ निम्नलिखितेषु द्वयोः व्याख्यां लिखत।** (१०)

(१) पञ्चलक्षणीत्यस्य समासार्थं विचारयत।

(२) 'न तावदव्यभिचरितत्वमि'ति मणिं व्याख्यात।

(३) प्रथमलक्षणावतरणिकां प्रतिपादयत।

**प्रश्नः- २ निम्नलिखितयोः एकस्य निबन्धात्मकमुत्तरं लिखत।** (१०)

(१) पूर्वपक्षव्याप्तिपरित्यागे बीजं यथाग्रन्थं व्याख्यात।

(२) प्रथमलक्षणं समन्वयपूर्वकं प्रतिपाद्य प्रथमलक्षणे दोषं दर्शयत।

### विभागः- २

**प्रश्नः- ३ निम्नलिखितेषु द्वयोः व्याख्यां विवृणुत।** (१०)

(१) "अधिकरणभेदेन अभावभेदः भिद्यते नवे"ति विचार्य सिद्धान्तमुपस्थापयत।

(२) द्वितीयलक्षणे समासविचारं कुरुत।

(३) 'घटत्वाभाववान् पटत्वा'दित्यत्र अव्याप्तिमुद्भाव्य वारयत।

**प्रश्नः- ४ निम्नलिखितयोः एकस्य निबन्धात्मकमुत्तरं लिखत।** (१०)

(१) साध्याभाववत्तायां सम्बन्धविशेषावच्छिन्नत्वनिवेशनप्रयोजनमुपपादयत।

(२) द्वितीयलक्षणस्वीकारे बीजं, समन्वयञ्च प्रतिपादयत।

### विभागः- ३

**प्रश्नः- ५ निम्नलिखितेषु द्वयोः व्याख्यां विवृणुत।** (१०)

(१) समनियतानामैक्यमिति प्रसङ्गं यथाग्रन्थं निरूपयत।

(२) अधिकरणभेदेन अभावभेदमवलम्ब्य किं लक्षणं प्रवृत्तम्? स्पष्टयत।

(३) द्वितीयलक्षणपरित्यागे गदाधरसम्मतं बीजं व्याख्यात।

**प्रश्नः- ६ निम्नलिखितयोः एकस्य निबन्धात्मकमुत्तरं लिखत।** (१०)

(१) तृतीयलक्षणं सदलसार्थक्यं साधयत ।

(२) द्वितीयलक्षणत्यागे बीजं प्रतिपाद्य सर्वत्र तृतीयलक्षणेन समन्वयं कुरुत।

**प्रश्नः- ७ निम्नलिखितप्रश्नेषु दशप्रश्नानाम् अतिलघूत्तराणि लिखन्तु।** (१०)

(१) अनुमितिकरणं किम्?

(२) अन्वयव्याप्तेः लक्षणं किम्?

(३) वह्निमान् धूमादित्यत्र हेतुः सद्धेतुरसद्धेतुर्वा?

(४) का नाम परीक्षा?

(५) केवलान्वयिसाध्यकस्थलमेकम् दर्शयत।

(६) प्रथमं लक्षणं किम्?

(७) साध्याभाववति साध्ये च किं बोध्यम्?

(८) केवलान्वयिहेतुर्नाम कः?

(९) द्वितीयलक्षणार्थवर्णनं समासपूर्वकं कथम्?

(१०) तत्त्वचिन्तामणेः रचयिता कः?

(११) भेदाभावः किं रूपः?

(१२) तृतीयलक्षणं किम्?

(१३) व्याप्तिलक्षणपञ्चकस्य परित्यागे हेतुः कः?

(१४) दीधितिकारस्य नाम किम्?

(१५) प्रथमलक्षणत्यागे बीजं किम्?

★★★★★★★★★★

# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्,
# सत्रान्तपरीक्षा-ओक्टोम्बर्,२०१९

कक्षाः- शास्त्री-२ (SEM-3) | प्रश्नपत्रम् - ५ | गुणाः - ७०

विषयः: नव्यन्यायः | (C.C- 2.3.5) | समयः -

दिनाङ्कः : | (ग्रन्थः – पञ्चलक्षणी, प्र.द्वि.तृतीय लक्षणानि)

## समाधानानि

(१) अनुमानम्।

(२) हेतुसत्त्वे साध्यसत्त्वम्।

(३) सद्धेतुः।

(४) परमतनिराकरणपूर्वकस्वमतव्यवस्थापनम्।

(५) सर्वमभिधेयं प्रमेयत्वादिति।

(६) साध्याभाववदवृत्तित्वम्।

(७) साकल्यम्।

(८) अत्यन्ताभावप्रतियोगिहेतुः।

(९) साध्यवद्भिन्नवृत्तिः यः साध्याभावः तद्वदवृत्तित्वम्।

(१०) श्री गङ्गेशोपाध्यायः।

(११) प्रतियोगितावच्छेदकरूपः।

(१२) साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यम्।

(१३) केवलान्वयिन्यभावात्।

(१४) रघुनाथशिरोमणिः।

(१५) अव्याप्यवृत्तिसाध्यके अव्याप्तिः।